अनुक्रमांक .........................                                                                   कोड नं० – S8SK903

# केन्द्रीय विद्यालय संगठन, पटना संभाग
# सत्रांत परीक्षा, 2018-19

212

कक्षा – नवमी

संस्कृत                Sl. No. ___________

समय – 3 घंटे]                                                                                   [पूर्णांक – 80

परीक्षापत्रे मूल्याङ्कनाय चत्वारः खण्डाः भविष्यन्ति ।

'क' खण्डः (अपठित-अवबोधनम्) 5 अङ्काः

'ख' खण्डः (रचनात्मककार्यम्) 15 अङ्काः

'ग' खण्डः (अनुप्रयुक्त-व्याकरणम्) 25 अङ्काः

'घ' खण्डः (पठित-अवबोधनम्) 35 अङ्काः

## 'क' खण्डः (अपठित-अवबोधनम्) 5 अङ्काः

1. अधोलिखतम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत- 5

परिश्रमः एव सर्वातिशयी सकलकामना-सिद्धिप्रदः उपायः वर्तते । सफलतायाः मंत्रः परिश्रमः एव । यत्र परिश्रमिणः वसन्ति तत्र सर्वाणि कार्याणि सिध्यन्ति । कार्याणि च यत्र सिध्यन्ति, तत्र प्रसन्तायाः आनन्दस्यैव वातावरणं भवति । सर्वे जनाः परस्परं स्नेहम् आदरम् च कुर्वन्ति । पुनश्च परिश्रमिणः मानसिकरूपेण शारीरिकरूपेण च स्वस्थाः नीरोगाश्च भूत्वा आयुष्मन्तः भवन्ति । एतत् विपरीतम् आलस्यमेकमेव मनुष्यस्य बलीयान् शत्रुः । आलस्यकारणात् मनुष्यः न केवलं स्वकीयम् अहितं करोति अपितु सर्वेषाम् एव जनानां कृते कष्टकारकः भवति । अलसाः जनाः स्वयमपि निष्फलाः असफलाश्च भवन्ति, ते अन्यान् अपि हतोत्साहाः कृत्वा निरर्थकाः इव सम्पादयन्ति । अतः आलस्यं विहाय परिश्रमः एव आचरणीयः ।

(i) एकपदेन उत्तरत – $4 \times ½ = 2$

(क) सफलतायाः मन्त्रः कः ?

(ख) मनुष्यस्य बलीयान् शत्रुः कः ?

(ग) निष्फलाः असफलाश्च के भवन्ति ?

(घ) किं विहाय परिश्रमः एव आचरणीयः ?

***Turn Over***

Scanned by CamScanner

(ii) पूर्णवाक्येन उत्तरत – 1

परिश्रमः कीदृशः उपायः वर्तते ?

(iii) यथा निर्देशम् उत्तरत – 4 × ½ = 2

( क ) 'यत्र परिश्रमिणः वसन्ति तत्र सर्वाणि कार्याणि सिध्यन्ति' अत्र विशेषणपदं किम् ?

1. परिश्रमिणः 2. सर्वाणि 3. कार्याणि 4. सिध्यन्ति

( ख ) 'आलस्यमेकमेव मनुष्यस्य बलीयान् शत्रुः भवति' अत्र कर्तृपदं किम् ?

1. आलस्यम् 2. मनुष्यस्य 3. बलीयान् 4. भवति

( ग ) 'ते अन्यान् अपि हतोत्साहाः सम्पादयन्ति' अत्र ते इति पदं केभ्यः प्रयुक्तम् ?

1. निष्फलेभ्यः 2. शत्रुभ्यः 3. अलसेभ्यः 4. सर्वेभ्यः

( घ ) 'रिपुः' इति पदस्य किं पर्यायपदं अत्र प्रयुक्तम् ?

1. अलसः 2. बलीयान् 3. असफलः 4. शत्रुः

**'ख' खण्डः (रचनात्मककार्यम्) 15 अङ्काः**

2. भावान् सुरेशः । विद्यालयात् अवकाशार्थं प्राचार्यं प्रति पत्रं मञ्जूषायां दत्तैः उचितपदैः पूरयित्वा पुनः उत्तरपुस्तिकायां लिखत – ½ × 10 = 5

सेवायाम्,

श्रीमन्तः ( 1 ) ...................... महोदयः

केन्द्रीय विद्यालयः पटना ।

( 2 ) ............................ ।

सविनयं ( 3 ) ............................ अस्ति यत् अहम् ( 4 ) ...................... विद्यालये ( 5 ) ........................ न शक्नोमि । तस्मात् ( 6 ) ............... मह्यं दिन ( 7 ) ........................ अवकाशं प्रदाय कृतार्थयन्तु भवन्तः । ( 8 ) ................... भवतः अतीव ( 9 ) ........................ भविष्यामि ।

दिनाङ्कः –...................... ।


( 10 ) ..............................

सुरेशः।

| आगन्तुम्, प्राचार्य, द्वयस्य, अहम्, भवदीयः शिष्य, मान्यवर, कृतज्ञः, कारणात्, निवेदनम्, अद्य |
|---|

Scanned by CamScanner

3. चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत - 2 × 5 = 10



| सूर्यः, वृक्षाः, पुष्पाणि, रमणीयं, मुनिः, विकसन्ति, गृहम्, वातावरणम्, पर्वतौ, मेघाः, उदयति, सन्ति |
|---|

**अथवा**

'मम विद्यालयः' इति विषयम् अधिकृत्य मञ्जूषायाः शब्दानां सहायतया पञ्च वाक्यानि लिखत -

| मम, विद्यालयः, छात्राः, पठन्ति, आनन्देन, शिक्षकः, समये पुस्तकं, प्रियः, प्रयोगशाला, करोति, अस्ति, ग्रन्थालयः |
|---|

## 'ग' खण्डः (अनुप्रयुक्त-व्याकरणम्) 25 अङ्काः

4. (क) उचितं वर्णं चित्वा वर्णवियोजने रिक्तस्थानं पूरयत- ½ × 2 = 1

(i) वैज्ञानिकः = व् + ऐ + ज् + - + आ + न् + इ + क् + अः (त्, र्, ञ्, म्)

(ii) नमस्कारः = न् + अ + म् + अ + - + क् + आ + र् + अः (स्, श्, ष्, न्)

(ख) निर्देशानुशारम् उत्तरत - 1 × 2 = 2

(i) 'ऊ' वर्णस्य उच्चारणस्थानं किम् अस्ति ? (कण्ठय, तालुः, ओष्ठौ)

(ii) 'त्' वर्णस्य उच्चारण-स्थानं किम् अस्ति ? (दन्तः, कण्ठः, तालुः)

5. रेखाङ्कितपदेषु सन्धिं विच्छेदं वा प्रदत्त-विकल्पेभ्यः चित्वा लिखत - 1 × 5 = 5

(क) वसन्ते <u>लसन्तीह</u> सरसा रसालाः ।

(i) लसन्ति + ह (ii) लसन्त + इह (iii) लसन्ति + इह

(ख) वृक्षा <u>लताश्च</u> फलानि पुष्पाणि इन्धनकाष्ठानि च बाहुल्येन समुपहरन्ति ।

(i) लताः + च (ii) लता + श्च (iii) लता + च

**Turn Over**

Scanned by CamScanner

(ग) <u>अहं त्वत्कृते</u> सोपानमवतारयामि।

(i) अहं + त्वत्कृते (ii) अहः + त्वत्कृते (iii) अहम् + त्वत्कृते

(घ) परिष्कृतं पर्यावरणम् अस्मभ्यं <u>सद्विचारं</u> प्रददाति ।

(i) सद् + विचारं (ii) सत् + विचारं (iii) स + नविचारं

(ङ) भगवन् ! <u>केयं</u> वाक् ।

(i) कः + इयम् (ii) का + इयम् (iii) के + यम्

6. उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत - 1 × 6 = 6

(क) अहं प्रातः सायं च ............... नमामि । ( ईश्वराय, ईश्वरं, ईश्वरेण )

(ख) तासु ............... पुष्पाणि आसन् । ( लतासु, लतेषु, लतायाम् )

(ग) गोपालः सर्वदा सुन्दराणि ............... धारयति । ( वस्त्रम्, वस्त्रे, वस्त्राणि )

(घ) ............... मम माता अस्ति । ( सः, सा, तत् )

(ङ) मम ............... पुत्रौ स्तः । ( द्वौ, द्वे, द्वयम् )

(च) वयम् ............... विद्यालये पठामः । ( एके, एकस्मिन्, एकस्याम् )

7. उचितधातुरूपाणि चित्वा रिक्तस्थानानि पूरयत - 1 × 3 = 3

(क) सः पाठं ............... । ( पठिष्यति, पठिष्यामि, पठिष्यन्ति )

(ख) ते जनाः विदेशे ............... । ( भवति, भवतः, भवन्ति )

(ग) आवां पितरौ ............... । ( सेवेते, सेवेथे, सेवावहे )

8. प्रदत्तविकल्पेभ्यः उचितपदं चित्वा रिक्तस्थानानि पूरयत - 1 × 4 = 4

(क) पिता ............... सह गच्छति ( पुत्रेण / पुत्री / पुत्राय )

(ख) ............... परितः वृक्षाः भवन्ति । ( ग्रामस्य, ग्रामम्, ग्रामाय )

(ग) ............... उपरि ध्वजः अस्ति । ( मन्दिरेण, मन्दिरस्य, मन्दिरम )

(घ) ............... बहिः मीनः न जीवति । ( जलस्य, जलेन, जलात् )

9. तत्पदं रेखाङ्कितं कुरुत यत्र - 1 × 4 = 4

(क) ल्यप् प्रत्ययः नास्ति -

(i) विहस्य (ii) आदाय (iii) लौहसहस्त्रस्य

Scanned by CamScanner

(ख) ते छात्राः देवं .................. (दृश् + क्त्वा) गच्छन्ति ।

(i) दृष्ट्वा (ii) द्रष्टुम् (iii) दर्शनीयम्

(ग) अहं जगन्नाथं नन्तुम् .................. इच्छामि ।

(i) नम् + क्त्वा (ii) नम् + क्त (iii) नम् + तुमुन्

(घ) महापुरुषाः जनान् .............. (उप + कृ + ल्यप्) प्रसीदन्ति ।

(i) उपकृत्य (ii) उपकार्य (iii) उपकृय

## 'ब' खण्डः (पठित-अवबोधनम्) 35 अङ्काः

10. अधोलिखितं गद्यांशं पठित्वा प्रश्ननाम् उत्तराणि लिखत - 6

तस्य च गृहे लौहघटिता पूर्वपुरुषोपार्जिता तुलासीत् । तां च कस्यचित् श्रेष्ठिनो गृहे निक्षेपभूतां कृत्वा देशान्तरं प्रस्थितः । ततः सुचिरं कालं यथेच्छया भ्रान्त्वा पुनः स्वपुरमागत्य तं श्रेष्ठिनमुवाच - 'भोः श्रेष्ठिन् ! दीयतां मे सा निक्षेपतुला ।' स आह- 'भोः नास्ति सा, त्वदीया तुला मूषकैर्भक्षिता' इति ।

जीर्णधन आह- 'भोः श्रेष्ठिन् ! नास्ति दोषस्ते, यदि मूषकैर्भक्षितेति । ईदृगेवायं संसारः । न किञ्चिदत्र शाश्वतमस्ति । परमहं नद्यां स्नानार्थं गमिष्यामि । तत् त्वमात्मीयं शिशुमेनं धनदेवनामानं मया सह स्नानोपकरणहस्तं प्रेषय' इति ।

(I) एकपदेन उत्तरत - 1 × 2 = 2

(i) का मूषकैः भक्षिता ?

(ii) श्रेष्ठिनः पुत्रस्य नाम किम् आसीत् ?

(II) पूर्णवाक्येन उत्तरत- 2

ततः सुचिरं कालं यथेच्छया भ्रान्त्वा पुनः स्वपुरमागत्य जीर्णधनः तं श्रेष्ठिनं किम् उवाच ?

(III) निर्देशानुसारम् उत्तरत- ½ × 4 = 2

(क) परमहं नद्यां स्नानार्थं गमिष्यामि । इति वाक्ये क्रियापदं किम् ?

(i) अपरम् (ii) नद्यां (iii) गमिष्यामि

(ख) तस्य च गृहे लौहघटिता पूर्वपुरुषोपार्जितां तुलासीत् । अत्र तस्य इति पदं कस्मै प्रयुक्तम् ?

(i) जीर्णधनाय (ii) श्रेष्ठिने (iii) धनदेवाय



Scanned by CamScanner

( ग ) 'सुचिरं कालं' इति पदयोः विशेष्यपदं किम् ?

(i) सुचिरं (ii) कालम् (iii) गृहम्

( घ ) अत्र 'गुणः' इति पदस्य कृते किं विलोमपदं प्रयुक्तम् ?

(i) पुनः (ii) प्रस्थितः (iii) दोषः

11. अधोलिखितं पद्यांशं पठित्वा प्रश्ननाम् उत्तराणि लिखत - 6

निवर्तय मतिं नीचां परदाराभिमर्शनात् ।
न तत्समाचरेद्धीरो यत्परोऽस्य विगर्हयेत् ॥

(i) एकपदेन उत्तरत - $1 \times 2 = 2$

( क ) कीदृशीं मतिं निवर्तय ?

( ख ) इमं श्लोकं कः रावणं कथयति ?

(ii) पूर्णवाक्येन उत्तरत- 2

धीरः कथं न समाचरेत् ?

(iii) निर्देशानुसारम् उत्तरत- $\frac{1}{2} \times 4 = 2$

( क ) 'निवर्तय मतिं नीचां' इति अत्र क्रियापदं किम् ?

(i) निवर्तय (ii) मतिम् (iii) नीचाम्

( ख ) 'मतिं नीचाम्' इति पदयोः विशेषणपदं किम् ?

(i) मतिम् (ii) नीचाम् (iii) रावणः

( ग ) 'वारणं कुरु' इति पदस्य अर्थे किं पदं प्रयुक्तम् ?

(i) परः (ii) विगर्हयेत् (iii) निवर्तय

( घ ) 'न तत् समाचरेत् धीरः' इति वाक्ये कर्त्ता कः ?

(i) तत् (ii) समाचरेत् (iii) धीरः

12. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 6

पुरुषः - भोस्तपस्विन् ! कथं माम् उपरुणत्सि । प्रयत्नेन किं न सिद्धं भवति ? कावश्यकता शिलानाम् ? सिकताभिरेव सेतुं करिष्यामि स्वसङ्कल्पदृढतया ।

तपोदत्तः - आश्चर्यम् ! सिकताभिरेव सेतुं करिष्यसि ? सिकता जलप्रवाहे स्थास्यति किम् ? भवता चिन्तितं न वा ?

Scanned by CamScanner

पुरुषः - ( सोत्प्रासम् ) चिन्तितम् चिन्तितम् । सम्यक् चिन्तितम् । नाहं सोपानमार्गैरट्तमधिरोढुं विश्वसिमि । समुत्प्लुत्यैव गन्तुं क्षमोऽस्मि ।

तपोदत्तः - ( सव्यंग्यम् )

साधु साधु ! आञ्जनेयमप्यतिक्रामसि ।

पुरुषः - ( सविमर्शम् )

कोऽत्र सन्देहः ? किञ्च ।

(i) एकपदेन उत्तरत - $1 \times 2 = 2$

( क ) पुरुषः काभिः एव सेतोः निर्माणम् करोति ?

( ख ) केन सर्वं सिद्धं भवति ?

(ii) पूर्णवाक्येन उत्तरत- 2

पुरुषः कस्मिन् न विश्वसिति ?

(iii) निर्देशानुसारम् उत्तरत- $\frac{1}{2} \times 4 = 2$

( क ) 'नाहं सोपानमार्गैरट्तमधिरोढुं विश्वसिमि' । इति वक्ये कर्तृपदं किम् ?

(i) न (ii) अहम् (iii) विश्वसिमि

( ख ) 'अवरोधम् करोषि' । इति पदयोः समानार्थकपदम् किम् ?

(i) उपरुणत्सि (ii) करिष्यसि (iii) तिष्ठसि

( ग ) भवता चिन्तितं न वा ? इति अत्र 'भवता' इति पदं कस्मै प्रयुक्तम् ?

(i) पुरुषाय (ii) तपोदत्ताय (iii) ज्ञानभद्राय

( घ ) 'सिकताभिरेव सेतुं करिष्यामि स्वसङ्कल्पदृढतया'। इति वाक्ये क्रियापदं किम् ?

(i) सिकताभिः (ii) सेतुम् (iii) करिष्यामि

13. रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत - $1 \times 5 = 5$

( क ) <u>भवता</u> घृतोत्पत्तिरहस्यं व्याख्यातम् ।

( ख ) प्रकृतिः <u>जीवनसुखं</u> प्रददाति ।

( ग ) तपोदत्तः <u>तपश्चर्यया</u> विद्यामवाप्तुं प्रवृत्तोऽस्ति ।।

( घ ) <u>जीर्णधनः</u> विभवक्षयात् देशान्तरं गन्तुमिच्छन् व्यचिन्तयत् ।

( ङ ) <u>वृक्षाः</u> फलं न खादन्ति ।



Scanned by CamScanner

14. अधोलिखितस्य श्लोकस्य अन्वयं मञ्जूषातः समुचितपदानि चित्वा पूरयत - $1 \times 4 = 4$

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः ।
तस्मात् तदेव वक्तव्यं वचने का दरिद्रता ॥

अन्वयः- सर्वे (i) .......... प्रियवाक्यप्रदानेन (ii) .......... तस्मात् तत् (iii) .......... वक्तव्यं वचने (iv) .......... दरिद्रता ।

| का, एव, जन्तवः, तुष्यन्ति |
|---|

15. अधोलिखितानि वाक्यानि घटनाक्रमानुसारं लिखत- $½ \times 8 = 4$

(i) अत्र आगत्य मया दृष्टं यत् पितामहः पितामही च त्वां मारयतः ।
(ii) महतः सङ्कटात् त्वं माम् उद्धृतवती ।
(iii) युवयोः उपचारम् अहं करिष्ये ।
(iv) श्वशुरः श्वश्रूः च सहिंस्रभावं विमलां निभालयन्तौ ताम् उपसर्पतः ।
(v) पुरुषनिरीक्षकेण सह सोमप्रभा प्रविशति ।
(vi) इयं मम श्वश्रूः सदैव मर्मघातिभिः कटुवचनैः आक्षिपति ।
(vii) तव पिता यावन्तं यौतुकराशिं प्रतिज्ञातवान् तावतः अर्धमेव समर्पितवान् ।
(viii) विमला आत्मत्राणाय सप्राणपणं प्रयतते ।

16. रेखाङ्कितानाम् पदानाम् प्रसङ्गानुसारं शुद्धमर्थं चित्वा लिखत - $1 \times 4 = 4$

( क ) काकेन <u>गवाक्षात्</u> कथितम् ।
(i) ग्रामात् (ii) कक्षात् (iii) वातायनात्

( ख ) हिमवान् <u>नगेन्द्रः</u> अस्ति ।
(i) पर्वतराजः (ii) नरेन्द्रः (iii) नद्यः

( ग ) यत्नेन <u>वृत्तं</u> रक्षेत् ।
(i) धनम् (ii) चरित्रम् (iii) विकारम्

( घ ) यत्र देशे <u>स्ववीर्यतः</u> भोगा भुक्ताः ।
(i) स्वधनेन (ii) स्वपुत्रेण (iii) स्वपराक्रमेण

***

Scanned by CamScanner